# Shri Bhavani Shankara AshtavadhanashlokAH

# श्रीभवानीशङ्कराष्टावधानश्लोकाः

## Document Information

Text title : Bhavani Shankara Ashtavadhanashlokah

File name : bhavAnIshankarAShTAvadhAnashlokAH.itx

Category : shiva

Location : doc_shiva

Transliterated by : Rajesh Thyagarajan

Proofread by : Rajesh Thyagarajan, NA

Source : Shri Chitrapura Stuti Manjari, 2019

Acknowledge-Permission: Shri Chitrapur Math - Publications Committee https://chitrapurmath.net/

Latest update : June 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2021

*sanskritdocuments.org*

# श्रीभवानीशङ्कराष्टावधानश्लोकाः

विप्राणामुपकारकान् शुभकरान् ऋग्वेदमन्त्रानिमान्
नानार्थाभिहितांस्त्वया प्रकटितान् भक्त्या मया भाषितान् ।
स्वर्गाधिष्ठितवासवादिविबुधैः सम्पूजिताङ्घ्रिद्वय
भक्तानामभयप्रदायक शिव त्वं शङ्कराकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“ऋग्वेदप्रिय ऋग्वेद”सेवामवधारय ॥ १॥

दिव्यं सुस्वर शोभनार्थकमिमं भक्त्या मया भाषितं
यज्ञानामुपयोगिनं शृणु यजुर्वेदं तवाह्लादकम् ।
स्वाहाकारयुजं सुरादिसुखदं दक्षाध्वरध्वंसक
साधूनां भवभीतिनाशनकर श्रीमद्भवानीपते ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“यजुर्वेदप्रिय यजुर्वेद”सेवामवधारय ॥ २॥

वेदानां परमं मया निगदितं कर्णामृतं तोषदं
दुष्टानां कथने विशारद चिरं त्रैलोक्यनाथाग्रणीः ।
भक्तानां परिपालनोत्सुकतम प्याट् सामगानप्रिय
हेमाद्रिस्थितयोगिवन्दितपद त्वं सामगानं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“सामवेदप्रिय सामवेद”सेवामवधारय ॥ ३॥

नानार्थाभिहितांस्त्वया प्रकटितांश्चाथर्ववेदोदयान्
मन्त्रान्वीर्ययुतानभीष्टफलदान् लोके त्वया विस्तृतान् ।
कैलासस्थितनन्दिमुख्यगणपैः स्तोत्रैः सदा वन्दित
लोकाभीष्टफलप्रदातृ गिरिश त्वं कृत्तिवासः शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक

“अथर्ववेदप्रिय अथर्ववेद”सेवामवधारय ॥ ४॥

षड्विंशात्मकतत्त्वसाधनकरं वेदान्तवेद्याव्यय
विश्वोत्पादक विश्वतोमुखमिदं त्वल्पाक्षरं सारवत् ।
अस्तोभं त्वनवद्यसूत्रममलं सर्वार्थसम्पादकं
शश्वत्संश्रुतिसागरं समुदितं वेदान्तशास्त्रं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“वेदान्तशास्त्रप्रिय वेदान्तशास्त्र”सेवामवधारय ॥ ५॥

भस्मोद्धूलितविग्रहोपनिषदां वाक्यैरुपबृंहितं
पाराशर्यकृतं पुराणमुदितं नित्यं मया भक्तितः ।
एतत्पञ्चसुलक्षणान्वितपदं ह्यध्यात्मतत्त्वं परं
शश्वत्संश्रुतिसागरोद्धर विभो त्वं सेतिहासं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“पुराणप्रिय पुराण”सेवामवधारय ॥ ६॥

विश्वाधारक विश्वपोषक भवन् विश्वाद्य विश्वेश्वर
विश्वेषां स्थितिसृष्टिनाशनविधे विश्वात्मकाधीश्वर ।
विद्याधारक विश्वरूपक गुरो विद्याप्रदातः प्रभो
विद्वद्भिर्नुत वन्द्यमानचरण त्वं गद्यमाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“गद्यपद्यप्रिय गद्यपद्य”सेवामवधारय ॥ ७॥

मातङ्गासुरकन्धरापहर भो माराङ्गसन्दाहक
माया पारग मान्य माधवसुहृन् मायागुणैर्मोहक ।
मायातीत निरञ्जनात्मक सदा माहेन्द्रवन्द्याद्य भो
मार्कण्डेयमुनीन्द्रपूजितपद सोमाष्टकं त्वं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“अष्टकप्रिय अष्टक”सेवामवधारय ॥ ८॥

श्रुत्यादिस्तुतिभिः प्रकाशित जटिन् विध्वग्निसूर्याम्बक
नानालङ्कृतभोऽन्धकासुररिपो विद्याधराख्यापितम् ।
भो स्वामिंस्तवमानसप्रियमिदं षड्जादिभेदान्वितं
श्रीरागादियुतं शुभं सुरुचिरं सङ्गीतमाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“सङ्गीतप्रिय सङ्गीत”सेवामवधारय ॥ ९॥

दैत्योन्मन्थविधौ पराक्रमनिधे हे शीर्षमालाधर
साधूनां हृदयाम्बुजस्थ सततं रुद्राक्षमालाधर ।
रक्षोहृद्भयकारकं शुभकरं दुग्धाच्छशङ्खोत्थितं
ॐकारध्वनिमीश कर्णमधुरं शम्भो सदाकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“शङ्खवाद्यप्रिय शङ्खवाद्य”सेवामवधारय ॥ १०॥

श्रीमच्छङ्करदेशिकादिगुरुभिः स्वाराधितानन्दद
श्रीमद्भक्तजनोत्तमैः कृतमिदं नादेन संशोभितम् ।
सप्तध्वानयुतं शुभं सुरुचिरं श्रीमन् मृडानीपते
शृङ्गालङ्कृतरागनादसहितं वेणुं सदा त्वं शृणु ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“वेणुवाद्यप्रिय वेणुवाद्य”सेवामवधारय ॥ ११॥

त्रिपुरदहनमूर्ते पावनापारकीर्ते
त्रिभुवनधरमूर्ते शूलपाणे त्रिमूर्ते ।
डमरुकधरमूर्ते विश्वमूर्तेऽष्टमूर्ते
भवभयहरमूर्ते मौरिवाद्यं श्रुणु त्वम् ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“मौरिवाद्यप्रिय मौरिवाद्य”सेवामवधारय ॥ १२॥

भेरिदुन्दुभिझर्झरोर्ध्वकतुरीशङ्खानकाङ्कीतत
ढक्कामर्दलतालवेणुडमरुश्रुत्यादिवाद्यारवान् ।
नानाभेदयुतान् जडीकृतककुम्घोषाश्रवो रन्ध्रकान्
श्रीवल्याख्यपुराधिवास भगवन् श्रीशङ्कराकर्णय ॥

देव देवोत्तम देवतासार्वभौम अखिलाण्डकोटिब्रह्माण्डनायक
“सर्ववाद्यप्रिय सर्ववाद्य”सेवामवधारय ॥ १३॥

इति वत्सगोत्रोत्पन्नगणपतिशर्मणा विरचिताः
श्रीभवानीशङ्कराष्टावधानश्लोकाः सम्पूर्णाः ।

Encoded and proofread by Rajesh Thyagarajan

*Shri Bhavani Shankara AshtavadhanashlokAH*
pdf was typeset on June 5, 2021

Please send corrections to *sanskrit@cheerful.com*